'शिव'ग्रन्थमाला : ग्रन्थांक–११

लक्ष्मीसूक्तसहितं

# पुरुषसूक्तं श्रीसूक्तं च

सम्पादकः

आचार्य पं० श्रीशिवदत्तमिश्रशास्त्री

प्रकाशकः

ठाकुरप्रसाद ऐण्ड सन्स बुक्सेलर

राजादरवाजा : कचौड़ीगली, वाराणसी मूल्य .१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः

# अथ पुरुषसूक्तम्

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिपादूर्द्ध्व ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥४॥
ततो विराडजायत विराजो ऽअधि पूरुषः ।
स जातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।६।
तस्माद्यज्ञात्सर्व्वहुत ऽऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।७।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मादश्वा ऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ।८।
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवा ऽअयजन्त साध्या ऽऋषयश्च ये ॥९॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरू पादा ऽउच्येते १०
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो ऽअजायत ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।१२।
नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ऽअकल्पयन्॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः १४
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुम् ॥१५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञेन यज्ञमयजन्त देवास्तानि
धर्म्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्व्वे साध्याः सन्ति देवाः ॥१६॥

इति पुरुषसूक्तं समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

# अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥ १ ॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काँ सोऽस्मि तां हिरण्यप्राकारा-
मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां
तामिहोपह्वये श्रियम् ॥४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं
श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमिं शरणं प्रपद्ये
ऽअलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आ॒दि॒त्यव॑र्णे तप॒सोऽधि॑जा॒तो
वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः ।
तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु
मा॒यान्त॑रायाश्च॑ बा॒ह्या ऽअ॑ल॒क्ष्मीः॥६॥

उपै॑तु॒ मां दे॒वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।
प्रा॒दु॒र्भू॒तो सु॑राष्ट्रे॒ऽस्मिन्की॒र्तिमृ॑द्धिं ददातु॑ मे ॥ ७ ॥

क्षु॑त्पिपा॒सामलां ज्ये॒ष्ठामल॒क्ष्मीं नाशया॒म्यहम् ।
अभू॑ति॒मस॑मृद्धिं॒ च सर्वां॒ निर्णु॑द मे गृहात् ॥ ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः कामामाकूतिं वाचः सत्यमशीमहि ।
पशूनांꣳ रूपमन्नस्य मयि श्रीः श्रयतां यशः । १० ।
कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥
आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां
(सुवर्णां हेम) पद्म मालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं
जातवेदो म आ वह ॥१३॥
आर्द्रां षः करिणीं षष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
तां म ऽआ वह जातवेदो
लक्ष्मीमनपगामिनीम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां सूक्तजापिनाम् ॥ ४ ॥
पद्मानने ! पद्मऊरू पद्माक्षि पद्मसम्भवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ ५ ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
विष्णुप्रियां सखीं देवीं नमाम्यच्युतवल्लभाम् ॥ ६ ॥
महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व

आनन्दः कर्दमश्चैव चिक्लीत इति विश्रुताः ।
ऋषयस्ते त्रयः प्रोक्ताः स्वयं श्रीरेव देवताः ॥ ९ ॥

ऋण-रोगादि-दारिद्र्यं पापञ्च अपमृत्यवः ।
भय-शोक-मनस्तापा नश्यन्तु मम सर्वदा ॥ १० ॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

इति लक्ष्मीसूक्तं समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

❀ इति ❀

लक्ष्मीसूक्तसहितं

# पुरुषसूक्तं श्रीसूक्तं च

❀ समाप्तम् ❀

मुद्रक :—श्री प्रेस, कतुवापुरा, विश्वेश्वरगंज, वाराणसी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri